# Bhumigita from ShrimadbhAgavatam

# શ્રીમદ્ભાગવતાન્તર્ગતં ભૂમિગીતમ્

## Document Information

Text title : shrimadbhAgavatAntargataM bhUmigIta

File name : bhUmigIta.itx

Category : gItam, giitaa, vyAsa

Location : doc_giitaa

Author : maharShi vyAsa

Description-comments : Bhagavatam skanda 12 adhyAya 3

Latest update : November 17, 2012

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# શ્રીમદ્ભાગવતાન્તર્ગતં ભૂમિગીતમ્

શ્રીશુક ઉવાચ ।
દૃષ્ટ્વાત્મનિ જયે વ્યગ્રાન્નૃપાન્હસતિ ભૂરિયમ્ ।
અહો મા વિજિગીષન્તિ મૃત્યોઃ ક્રીડનકા નૃપાઃ ॥ ૧૨.૩.૦૧॥

કામ એષ નરેન્દ્રાણાં મોઘઃ સ્યાદ્વિદુષામપિ ।
યેન ફેનોપમે પિણ્ડે યેઽતિવિશ્રમ્ભિતા નૃપાઃ ॥ ૧૨.૩.૦૨॥

પૂર્વં નિર્જિત્ય ષડ્વર્ગં જેષ્યામો રાજમન્ત્રિણઃ ।
તતઃ સચિવપૌરાપ્ત કરીન્દ્રાનસ્ય કણ્ટકાન્ ॥ ૧૨.૩.૦૩॥

એવં ક્રમેણ જેષ્યામઃ પૃથ્વીં સાગરમેખલામ્ ।
ઇત્યાશાબદ્ધહૃદયા ન પશ્યન્ત્યન્તિકેઽન્તકમ્ ॥ ૧૨.૩.૦૪॥

સમુદ્રાવરણાં જિત્વા માં વિશન્ત્યબ્ધિમોજસા ।
કિયદાત્મજયસ્યૈતન્મુક્તિરાત્મજયે ફલમ્ ॥ ૧૨.૩.૦૫॥

યાં વિસૃજ્યૈવ મનવસ્તત્સુતાશ્ચ કુરૂદ્વહ ।
ગતા યથાગતં યુદ્ધે તાં માં જેષ્યન્ત્યબુદ્ધયઃ ॥ ૧૨.૩.૦૬॥

મત્કૃતે પિતૃપુત્રાણાં ભ્રાતૄણાં ચાપિ વિગ્રહઃ ।
જાયતે હ્યસતાં રાજ્યે મમતાબદ્ધચેતસામ્ ॥ ૧૨.૩.૦૭॥

મમૈવેયં મહી કૃત્સ્ના ન તે મૂઢેતિ વાદિનઃ ।
સ્પર્ધમાના મિથો ઘ્નન્તિ મ્રિયન્તે મત્કૃતે નૃપાઃ ॥ ૧૨.૩.૦૮॥

પૃથુઃ પુરૂરવા ગાધિર્નહુષો ભરતોઽર્જુનઃ ।
માન્ધાતા સગરો રામઃ ખટ્વાઙ્ગો ધુન્ધુહા રઘુઃ ॥ ૧૨.૩.૦૯॥

તૃણબિન્દુર્યયાતિશ્ચ શર્યાતિઃ શન્તનુર્ગયઃ ।
ભગીરથઃ કુવલયાશ્વઃ કકુત્સ્થો નૈષધો નૃગઃ ॥ ૧૨.૩.૧૦॥

હિરણ્યકશિપુર્વૃત્રો રાવણો લોકરાવણઃ ।

નમુચિઃ શમ્બરો ભૌમો હિરણ્યાક્ષોઽથ તારકઃ ॥ ૧૨.૩.૧૧॥

અન્યે ચ બહવો દૈત્યા રાજાનો યે મહેશ્વરાઃ ।
સર્વે સર્વવિદઃ શૂરાઃ સર્વે સર્વજિતોઽજિતાઃ ॥ ૧૨.૩.૧૨॥

મમતાં મય્યવર્તન્ત કૃત્વોચ્ચૈર્મર્ત્યધર્મિણઃ ।
કથાવશેષાઃ કાલેન હ્યકૃતાર્થાઃ કૃતા વિભો ॥ ૧૨.૩.૧૩॥

કથા ઇમાસ્તે કથિતા મહીયસાં વિતાય લોકેષુ યશઃ પરેયુષામ્ ।
વિજ્ઞાનવૈરાગ્યવિવક્ષયા વિભો વચોવિભૂતીર્ન તુ પારમાર્થ્યમ્ ॥ ૧૨.૩.૧૪॥

યસ્તૂત્તમઃશ્લોકગુણાનુવાદઃ સઙ્ગીયતેઽભીક્ષ્ણમમઙ્ગલઘ્નઃ ।
તમેવ નિત્યં શ ृણુયાદભીક્ષ્ણં કૃષ્ણેઽમલાં ભક્તિમભીપ્સમાનઃ ॥ ૧૨.૩.૧૫॥

॥ ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં સંહિતાયાં દ્વાદશસ્કન્ધે
તૃતીયોઽધ્યાયાન્તર્ગતં ભૂમિગીતં સમાપ્તમ્ ॥ ૧૨.૩॥

Bhagavatam skanda 12 adhyAya 3

---

*Bhumigita from ShrimadbhAgavatam*
pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*